# Surya Ashtakam

# સૂર્યાષ્ટકમ્

## Document Information

Text title : sUryAShTakam 1

File name : sUryAShTakam.itx

Category : aShTaka, navagraha

Location : doc_z_misc_navagraha

Transliterated by : NA

Proofread by : NA

Latest update : November 25, 2006

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

# સૂર્યાષ્ટકમ્

॥ શ્રી ગણેશાય નમઃ ॥

સામ્બ ઉવાચ ॥

આદિદેવ નમસ્તુભ્યં પ્રસીદ મમ ભાસ્કર ।
દિવાકર નમસ્તુભ્યં પ્રભાકર નમોઽસ્તુતે ॥ ૧॥

સપ્તાશ્વરથમારૂઢં પ્રચણ્ડં કશ્યપાત્મજમ્ ।
શ્વેતપદ્મધરં દેવં તં સૂર્યં પ્રણમામ્યહમ્ ॥ ૨॥

લોહિતં રથમારૂઢં સર્વલોકપિતામહમ્ ।
મહાપાપહરં દેવં તં સૂર્યં પ્રણમામ્યહમ્ ॥ ૩॥

ત્રૈગુણ્યં ચ મહાશૂરં બ્રહ્માવિષ્ણુમહેશ્વરમ્ ।
મહાપાપહરં દેવં તં સૂર્યં પ્રણમામ્યહમ્ ॥ ૪॥

બૃંહિતં તેજઃપુઞ્જં ચ વાયુમાકાશમેવ ચ ।
પ્રભું ચ સર્વલોકાનાં તં સૂર્યં પ્રણમામ્યહમ્ ॥ ૫॥

બન્ધૂકપુષ્પસઙ્કાશં હારકુણ્ડલભૂષિતમ્ ।
એકચક્રધરં દેવં તં સૂર્યં પ્રણમામ્યહમ્ ॥ ૬॥

તં સૂર્યં જગત્કર્તારં મહાતેજઃપ્રદીપનમ્ ।
મહાપાપહરં દેવં તં સૂર્યં પ્રણમામ્યહમ્ ॥ ૭॥

તં સૂર્યં જગતાં નાથં જ્ઞાનવિજ્ઞાનમોક્ષદમ્ ।
મહાપાપહરં દેવં તં સૂર્યં પ્રણમામ્યહમ્ ॥ ૮॥

સૂર્યાષ્ટકં પઠેન્નિત્યં ગ્રહપીડાપ્રણાશનમ્ ।
અપુત્રો લભતે પુત્રં દરિદ્રો ધનવાન્ભવેત્ ॥ ૯॥

આમિશં મધુપાનં ચ યઃ કરોતિ રવેર્દિને ।
સપ્તજન્મ ભવેદ્રોગી પ્રતિજન્મ દરિદ્રતા ॥ ૧૦॥

સ્ત્રીતૈલમધુમાંસાનિ યસ્ત્યજેત્તુ રવેર્દિને ।
ન વ્યાધિઃ શોકદારિદ્ર્યં સૂર્યલોકં સ ગચ્છતિ ॥ ૧૧॥

ઇતિ શ્રીસૂર્યાષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Surya Ashtakam*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*